# Arunika Upanishad

# આરુણિકોપનિષત્

## Document Information

Text title : Arunika Upanishad

File name : aruni.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 16/108; Sama Veda, Sannyasa Upanishad

Latest update : Sept. 24, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# આરુણિકોપનિષત્

॥ આરુણિકોપનિષત્ ॥ 16
આરુણિકાખ્યોપનિષત્ખ્યાતસંન્યાસિનોઽમલાઃ ।
યત્પ્રબોધાદ્યાન્તિ મુક્તિં તદ્રામબ્રહ્મ મે ગતિઃ ॥

ૐ આપ્યાયન્ત્વિતિ શાન્તિઃ ॥

ૐ આરુણિઃ પ્રાજાપત્યઃ પ્રજાપતેર્લોકં જગામ । તં ગત્વોવાચ । કેન ભગવન્કર્માણ્યશેષતો વિસૃજામીતિ । તં હોવાચ પ્રજાપતિસ્તવ પુત્રાન્ભ્રાતૄન્બન્ધ્વાદીઞ્છિખાં યજ્ઞોપવીતં યાગં સ્વાધ્યાયં ભૂર્લોકભુવર્લોકસ્વર્લોકમહર્લોકજનોલોકતપોલોકસત્યલોકં ચાતલતલાતલવિતલસુતલરસાતલમહાતલપાતાલં બ્રહ્માણ્ડં ચ વિસૃજેત્ । દણ્ડમાચ્છાદનં ચૈવ કૌપીનં ચ પરિગ્રહેત્ । શેષં વિસૃજેદિતિ ॥ ૧॥

ગૃહસ્થો બ્રહ્મચારી વા વાનપ્રસ્થો વા ઉપવીતં ભૂમાવપ્સુ વા વિસૃજેત્ । લૌકિકાગ્નીનુદરાગ્નૌ સમારોપયેત્ । ગાયત્રીં ચ સ્વવાચાગ્નૌ સમારોપયેત્ । કુટીચરો બ્રહ્મચારી કુટુંબં વિસૃજેત્ । પાત્રં વિસૃજેત્ । પવિત્રં વિસૃજેત્ । દણ્ડાઁલોકાંશ્ચ વિસૃજેદિતિ હોવાચ । અત ઉર્ધ્વમમન્ત્રવદાચરેત્ । ઊર્ધ્વગમનં વિસૃજેત્ । ઔષધવદશનમાચરેત્ । ત્રિસન્ધ્યાદૌ સ્નાનમાચરેત્ । સન્ધિં સમાધાવાત્મન્યાચરેત્ । સર્વેષુ વેદેષ્વારણ્યકમાવર્તયેદુપનિષદમાવર્તયેદુપનિષદમાવર્તય્ એદિતિ ॥ ૨॥

ખલ્વહં બ્રહ્મસૂચનાત્સૂત્રં બ્રહ્મસૂત્રમહમેવ

વિદ્વાન્ત્રિવૃત્સૂત્રં ત્યજેદ્વિદ્વાન્ય એવં વેદ સંન્યસ્તં મયા
સંન્યસ્તં મયા સંન્યસ્તં મયેતિ ત્રિરુક્ત્વાભયં
સર્વભૂતેભ્યો મત્તઃ સર્વં પ્રવર્તતે । સખામાગોપાયોજઃ
સખાયોઽસીન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નઃ શર્મ મે ભવ
યત્પાપં તન્નિવારયેતિ । અનેન મન્ત્રેણ કૃતં વાઇણવં
દણ્ડં કૌપીનં
પરિગ્રહેદૌષધવદશનમાચરેદૌષધવદશનં
પ્રાશ્નીયાદ્યથાલાભમશ્નીયાત્ । બ્રહ્મચર્યમહિંસા
ચાપરિગ્રહં ચ સત્યં ચ યત્નેન હે રક્ષત હે રક્ષત હે
રક્ષત ઇતિ ॥ ૩॥

અથાતઃ પરમહંસપરિવ્રાજકાનામાસનશયનાદિકં ભૂમૌ
બ્રહ્મચર્યં મૃત્પાત્રમલામ્બુપાત્રં દારુપાત્રં વા
યતીનાં
કામક્રોધહર્ષરોષલોભમોહદમ્ભદર્પેચ્છાસૂયામમત્વાહઙ્
આરાદીનપિ પરિત્યજેત્ । વર્ષાસુ ધ્રુવશીલોઽષ્ટૌ
માસાનેકાકી યતિશ્ચરેત્ દ્વાવેવ વા વિચરેદ્વ્વાવેવ વા
વિચરેદિતિ ॥ ૩॥

સ ખલ્વેવં યો વિદ્વાન્સોપનયનાદૂર્ધ્વમેતાનિ પ્રાગ્વા ત્યજેત્
। પિત્રં પુત્રમગ્ન્યુપવીતં કર્મ કલત્રં ચાન્યદપીહ યતયો
ભિક્ષાર્થં ગ્રામં પ્રવિશન્તિ પાણિપાત્રમુદરપાત્રં વા ।
ૐ હિ ૐ હિ ૐ હીત્યેતદુપનિષદં વિન્યસેત્ ॥

ખલ્વેતદુપનિષદં વિદ્વાન્ય એવં વેદ પાલાશં
બૈલ્વમાશ્વત્થમૌદુમ્બરં દણ્ડં મૌઞ્જી મેખલાં
યજ્ઞોપવીતં ચ ત્યક્ત્વા શૂરો ય એવં વેદ । તદ્વિષ્ણોઃ
પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ।
તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે । વિષ્ણોર્યત્પરમં
પદમિતિ । એવં નિર્વાણાનુશાસનં વેદાનુશાસનં
વેદાનુશાસનમિતિ ॥ ૫॥

ઇતિ સામવેદીયારુણિકોપનિષત્સમાપ્તા ॥

*Arunika Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*